श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीभगवद्रामानुजमुनिभिरनुगृहीतम्

# ॥ श्रीवैकुण्ठगद्यम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीवैकुण्ठगद्यम् ॥

यामुनार्यसुधाम्भोधिं अवगाह्य यथामति।
आदाय भक्तियोगाख्यं रत्नं सन्दर्शयाम्यहम्॥

स्वाधीन त्रिविध चेतनाचेतन स्वरूपस्थितिप्रवृत्तिभेदं⋆ क्लेशकर्माद्यशेषदोषासंस्पृष्टं⋆ स्वाभाविकानवधिकातिशय ज्ञान बलैश्वर्य वीर्यशक्तितेजः प्रभृत्यसङ्ख्येय कल्याणगुणगणौघमहार्णवं⋆ परमपुरुषं⋆ भगवन्तं⋆ नारायणं⋆ स्वामित्वेन सुहृत्त्वेन गुरुत्वेन च परिगृह्य⋆ ऐकान्तिकात्यन्तिक तत्पादाम्बुजद्वय परिचर्यैकमनोरथः⋆ तत्प्राप्तये च तत्पादाम्बुजद्वय प्रपत्तेरन्यन्न मे कल्पकोटि सहस्रेणापि साधनमस्तीति मन्वानः⋆ तस्यैव भगवतो नारायणस्य⋆ अखिलसत्त्व दयैकसागरस्य⋆ अनालोचित गुणागुण अखण्डजनानुकूल अमर्याद शीलवतः⋆ स्वाभाविकानवधिकातिशय गुणवत्तया⋆ देवतिर्यङ्मनुष्यादि अखिलजन हृदयानन्दनस्य⋆ आश्रितवात्सल्यैकजलधेः⋆ भक्तजनसंश्लेषैकभोगस्य⋆ नित्यज्ञानक्रियैश्वर्यादि भोगसामग्रीसमृद्धस्य⋆ महाविभूतेः⋆ श्रीमच्चरणारविन्दयुगळं⋆ अनन्यात्म सञ्जीवनेन⋆ तद्गतसर्वभावेन⋆ शरणमनुव्रजेत्॥

ततश्च प्रत्यहं आत्मोज्जीवनाय एवमनुस्मरेत्⋆ चतुर्दशभुवनात्मकमण्डं⋆ दशगुणितोत्तरं च आवरणसप्तकं⋆ समस्तं कार्य कारणजातमतीत्य वर्तमाने⋆ परमव्योमशब्दाभिधेये⋆ ब्रह्मादीनां वाङ्मनसाऽगोचरे⋆ श्रीमति वैकुण्ठे दिव्यलोके⋆ सनकविधिशिवादिभिरपि अचिन्त्यस्वभावैश्वर्यैः⋆ नित्यसिद्धैः⋆ अनन्तैः⋆ भगवदानुकूल्यैकभोगैः⋆ दिव्यपुरुषैः⋆ महात्मभिरापूरिते⋆ तेषामपि इयत्परिमाणं इयदैश्वर्यं ईदृशस्वभावं इति परिच्छेत्तुमयोग्ये⋆ दिव्यावरणशतसहस्रावृते⋆ दिव्यकल्पतरूपशोभिते⋆ दिव्योद्यानशतसहस्रकोटिभिरावृते⋆ अतिप्रमाणे दिव्यायतने⋆ कस्मिंश्चित् विचित्र दिव्यरत्नमये दिव्यास्थानमण्डपे⋆ दिव्यरत्नस्तम्भ शतसहस्रकोटिभिरुपशोभिते⋆ दिव्यनानारत्नकृतस्थलविचित्रिते⋆

दिव्यालङ्कारालङ्कृते⋆ परितः पतितैः पतमानैः पादपस्थैश्च
नानागन्धवर्णैर्दिव्यपुष्पैः शोभमानैः दिव्यपुष्पोपवनैरुपशोभिते⋆
सङ्कीर्णपारिजातादिकल्पद्रुमोपशोभितैः⋆ असङ्कीर्णैश्च कैश्चिदन्तस्स्थ
पुष्परत्नादि निर्मित दिव्यलीलामण्डप शतसहस्रोपशोभितैः⋆
सर्वदाऽनुभूयमानैरपि अपूर्ववदाश्चर्यमावहद्भिः⋆ क्रीडाशैलशतसहस्रैरलङ्कृतैः⋆
कैश्चित् नारायणदिव्यलीलाऽसाधारणैः⋆ कैश्चित्
पद्मवनालयादिव्यलीलाऽसाधारणैः⋆ साधारणैश्च कैश्चित्
शुकशारिकामयूरकोकिलादिभिः कोमलकूजितैराकुलैः⋆
दिव्योद्यानशतसहस्रकोटिभिरावृते⋆ मणिमुक्ताप्रवालकृतसोपानैः⋆
दिव्यामलामृतरसोदकैः⋆ दिव्याण्डजवरैः⋆ अतिरमणीयदर्शनैः⋆
अतिमनोहरमधुरस्वरैः⋆ आकुलैः⋆ अन्तस्थ मुक्तामय
दिव्यक्रीडास्थानोपशोभितैः⋆ दिव्य सौगन्धिकवापीशतसहस्रैः⋆
दिव्यराजहंसावलीविराजितैरावृते⋆ निरस्तातिशय आनन्दैकरसतया च
आनन्त्याच्च प्रविष्टान् उन्मादयद्भिः क्रीडोद्देशैर्विराजिते⋆ तत्र तत्र कृत
दिव्यपुष्पपर्यङ्कोपशोभिते⋆ नानापुष्पासवास्वाद मत्तभृङ्गावलीभिरुद्गीयमान
दिव्यगान्धर्वेणापूरिते⋆ चन्दनागरुकर्पूर दिव्यपुष्पावगाहि मन्दानिलासेव्यमाने⋆
मध्ये दिव्यपुष्पसञ्चयविचित्रिते⋆ महति दिव्ययोगपर्यङ्के⋆ अनन्तभोगिनि⋆
श्रीमद्वैकुण्ठैश्वर्यादि दिव्यलोकं आत्मकान्त्या विश्वमाप्याययन्त्या⋆
शेषशेषाशनादिकं सर्वं परिजनं भगवतस्तत्तदवस्थोचित परिचर्यायां
आज्ञापयन्त्या⋆ शीलरूपगुणविलासादिभिः आत्मानुरूपया श्रिया
सहासीनम्⋆ प्रत्यग्रोन्मीलित सरसिजसदृश नयनयुगळम्⋆
स्वच्छनीलजीमूतसङ्काशम्⋆ अत्युज्ज्वलपीतवाससम्⋆ स्वया प्रभया
अतिनिर्मलया अतिशीतलया अतिकोमलया स्वच्छ माणिक्याभया कृत्स्नं
जगदुद्भासयन्तम्⋆ अचिन्त्य दिव्याद्भुत नित्ययौवन
स्वभावलावण्यमयामृतसागरम्⋆ अतिसौकुमार्यात् ईषत् प्रस्विन्नवदालक्ष्यमाण
ललाटफलक दिव्यालकावलीविराजितम्⋆ प्रबुद्धमुग्धाम्बुजचारुलोचनं⋆
सविभ्रमभ्रूलतम्⋆ उज्ज्वलाधरं⋆ शुचिस्मितं⋆ कोमलगण्डम्⋆ उन्नसम्⋆
उदग्रपीनांस विलम्बिकुण्डलालकावलीबन्धुरकम्बुकन्धरं⋆ प्रियावतंसोत्पल
कर्णभूषणश्लथालकाबन्ध विमर्दशंसिभिः

चतुर्भिराजानुविलम्बिभिर्भुजैर्विराजितम्⋆ अतिकोमल दिव्यरेखालङ्कृत आताम्रकरतलं⋆ दिव्याङ्गुलीयकविराजितम्⋆ अतिकोमल दिव्य नखावली विराजितम्⋆ अतिरक्ताङ्गुळीभिरलङ्कृतम्⋆ तत्क्षणोन्मीलित पुण्डरीक सदृश चरणयुगळम्⋆ अतिमनोहर किरीट मकुट चूडावतंस मकरकुण्डल ग्रैवेयक हार केयूर कटक श्रीवत्स कौस्तुभ मुक्तादामोदरबन्धन पीताम्बर काञ्चीगुण नूपुरादिभिः अत्यन्तसुखस्पर्शैर्दिव्यगन्धैर्भूषणैर्भूषितं⋆ श्रीमत्या वैजयन्त्या वनमालया विराजितं⋆ शङ्खचक्र गदासि शार्ङ्गादि दिव्यायुधैः सेव्यमानं⋆ स्वसङ्कल्पमात्रावक्लृप्त जगज्जन्मस्थितिध्वंसादिके श्रीमति विष्वक्सेने न्यस्तसमस्तात्मैश्वर्यम्⋆ वैनतेयादिभिः स्वभावतो निरस्त समस्त सांसारिकस्वभावैः⋆ भगवत्परिचर्याकरणयोग्यैः⋆ भगवत्परिचर्यैकभोगैः⋆ नित्यसिद्धैः⋆ अनन्तैः⋆ यथायोगं सेव्यमानं⋆ आत्मभोगेनाननुसंहित परादिकालम्⋆ दिव्यामल कोमलावलोकनेन विश्वमाह्लादयन्तम्⋆ ईषदुन्मीलित मुखाम्बुजोदरविनिर्गतेन⋆ दिव्याननारविन्द शोभाजनकेन⋆ दिव्यगाम्भीर्य औदार्य सौन्दर्य माधुर्याद्यनवधिक गुणगणविभूषितेन⋆ अतिमनोहरदिव्यभावगर्भेण⋆ दिव्यलीलालापामृतेन⋆ अखिलजनहृदयान्तराण्यापुरयन्तं भगवन्तं नारायणं ध्यानयोगेन दृष्ट्वा⋆ ततो भगवतो नित्यस्वाम्यम्⋆ आत्मनो नित्यदास्यं च यथावस्थितमनुसन्धाय⋆ कदाऽहं भगवन्तं नारायणं मम कुलनाथं मम कुलदैवतं मम कुलधनं मम भोग्यं मम मातरं मम पितरं मम सर्वं साक्षात्करवाणि चक्षुषा⋆ कदाऽहं भगवत्पादाम्बुजद्वयं शिरसा धारयिष्यामि⋆ कदाऽहं भगवत्पादाम्बुजद्वय परिचर्याशया निरस्तसमस्तेतर भोगाशः⋆ अपगत समस्त सांसारिकस्वभावः⋆ तत्पादाम्बुजद्वयं प्रवेक्ष्यामि⋆ कदाऽहं भगवत्पदाम्बुजद्वय परिचर्याकरणयोग्यः तदेकभोगः तत्पादौ परिचरिष्यामि⋆ कदा मां भगवान् स्वकीयया अतिशीतलया दृशा अवलोक्य⋆ स्निग्धगम्भीर मधुरया गिरा परिचर्यायां आज्ञापयिष्यति⋆ इति भगवत्परिचर्यायां आशां वर्धयित्वा⋆ तयैवाशया तत्प्रसादोपबृंहितया भगवन्तं उपेत्य⋆ दूरादेव भगवन्तं शेषभोगे श्रिया सहासीनम्⋆ वैनतेयादिभिः सेव्यमानम्⋆ समस्तपरिवाराय श्रीमते नारायणाय नमः⋆ इति प्रणम्य⋆ उत्थायोत्थाय पुनः पुनः प्रणम्य⋆ अत्यन्त साध्वसविनयावनतो भूत्वा⋆ भगवत्पारिषद गणनायकैः द्वारपालैः

कृपया स्नेहगर्भया दृशाऽवलोकितः⋆ सम्यगभिवन्दितैः तैस्तैरेवानुमतो भगवन्तमुपेत्य⋆ श्रीमता मूलमन्त्रेण⋆ मां ऐकान्तिकात्यन्तिक परिचर्याकरणाय परिगृह्णीष्व⋆ इति याचमानः प्रणम्य⋆ आत्मानं भगवते निवेदयेत्॥

ततो भगवता स्वयमेवात्मसञ्जीवनेन अमर्यादशीलवता अतिप्रेमान्वितेनावलोकनेनावलोक्य⋆ सर्वदेशसर्वकालसर्वावस्थोचित अत्यन्तशेषभावाय स्वीकृतः⋆ अनुज्ञातश्च⋆ अत्यन्तसाध्वसविनयावनतः⋆ किङ्कुर्वाणः⋆ कृताञ्जलिपुटः⋆ भगवन्तमुपासीत॥

ततश्चानुभूयमान भावविशेषः⋆ निरतिशयप्रीत्या अन्यत् किञ्चित् कर्तुं द्रष्टुं स्मर्तुमशक्तः⋆ पुनरपि शेषभावमेव याचमानः⋆ भगवन्तमेवाविच्छिन्न स्रोतोरूपेण अवलोकनेनावलोकयन् आसीत॥

ततो भगवता स्वयमेवात्मसञ्जीवनेन अवलोकनेनावलोक्य⋆ सस्मितमाहूय⋆ समस्तक्लेशापहं⋆ निरतिशयसुखावहम्⋆ आत्मीयं⋆ श्रीमत्पादारविन्दयुगळं⋆ शिरसि कृतं ध्यात्वा⋆ अमृतसागरान्तर्निमग्नसर्वावयवः सुखमासीत॥

लक्ष्मीपतेर्यतिपतेश्च दयैकधाम्नोः
योऽसौ पुरा समजनिष्ट जगद्धितार्थम्।
प्राच्यं प्रकाशयतु नः परमं रहस्यं
संवाद एष शरणागतिमन्त्रसारः॥

॥ इति श्रीवैकुण्ठगद्यं संपूर्णम्॥